

जगन्नाथचरितम्


इन्द्रद्युम्नः नाम राजा पूर्वम् अवन्तीनामकं राज्यं पालयन् आसीत्। सः धर्मेण राज्यं पालयति स्म। अतः तस्य राज्ये प्रजाः निश्चिन्ताः आसन्। राज्ये सुखं शान्तिः च सदा तिष्ठति स्म। युद्धभयं तु सर्वथा न आसीत्। सस्यसम्पत्तिः, धान्यसम्पत्तिः, धनसम्पत्तिः च तत्र पर्याप्तमात्रेण आसीत्।

इन्द्रद्युम्नः यथा समर्थः राजा तथैव कलाभिमानी, पण्डितप्रियः, कलापोषकः चापि आसीत्। तस्य गुणातिशयं, राज्यपालनक्रमं च अधिकृत्य कवयः स्फूर्त्या पद्यानि रचयन्ति स्म।

एवं देशे सर्वविधसमृद्धिः अस्ति चेदपि काचित् अमूर्ता असन्तृप्तिः राजानं सदा बाधते। तथापि एषा असन्तृप्तिः किमर्थम् इति न जानाति सः। असन्तृप्तेः स्वरूपम् अपि न ज्ञायते तेन। अतः सः तस्याः असन्तृप्तेः स्वरूपं कारणं च ज्ञातुम् अहोरात्रं चिन्तयन् भवति। निरन्तरमथनात् उत्पन्नं नवनीतम् अन्ते यथा पिण्डीभूतं भवति, तथैव निरन्तरचिन्तनेन असन्तृप्तेः स्पष्टं स्वरूपं ज्ञातम् इन्द्रद्युम्नेन।

'आगामिनि काले भक्तानां यात्रास्थलं भवितुम् अर्हं उत्तमं देवमन्दिरं किमपि स्वदेशे नास्ति' इति चिन्तितवान् सः। देवालयस्य अभावः एव एतावत्पर्यन्तम् अमूर्तरूपेण तिष्ठन् राजानं बाधते स्म। 'शीघ्रम् एव कश्चन उत्तमः देवालयः निर्मातव्यः' इति निश्चितवान् सः। एतदनन्तरं सा असन्तृप्तिपीडा अपगता।

१. मन्दिरनिर्माणम्।



देवालयस्य निर्माणस्य अनन्तरं काचित् देवतामूर्तिः अपि तत्र प्रतिष्ठापनीया भवति खलु? निर्मीयमाणे देवालये का मूर्तिः प्रतिष्ठापनीया इति बहुधा चिन्तितवान् राजा। किन्तु तेन कोऽपि निर्णयः न प्राप्तः।

इन्द्रद्युम्नः कदाचित् निद्रां कृतवान् आसीत्। तदा तेन स्वप्ने– 'प्रथमम् आलयस्य निर्माणं भवतु। योग्ये काले प्राप्ते प्रतिष्ठापनीया मूर्तिः स्वयं प्राप्यते' इति ध्वनिः तेन श्रुतः। 'देवेन एव एतादृशं वचनम् उक्तं स्यात्' इति भावितवान् सः। समस्या परिहृता। मनः निर्मलं जातम्।

अनन्तरदिने सः मन्त्रिणम् आहूय मन्दिरनिर्माणविषयम् उपस्थापितवान्। मन्दिरनिर्माणार्थं योग्यं स्थलं निश्चितम्। मन्दिरस्य आकारः अपि स्थूलतया निश्चितः। ज्योतिषिकाः ग्रहगतिम् अवलोक्य मन्दिरनिर्माणारम्भार्थं योग्यं मुहूर्तं निश्चित्य सूचितवन्तः।

पुरीनगरस्य समुद्रतीरे सुविशाले समतलस्थले निश्चिते मुहूर्ते मङ्गलवाद्यानां ध्वनिः उत्पन्नः। आगमशास्त्रज्ञाः होमाग्नौ मन्त्राहुतीः समर्पितवन्तः। तत्र सर्वत्र मन्त्राणां प्रतिध्वनिः श्रूयते। होमधूमेन समग्रः आकाशः व्याप्तः अभवत्।

आलयनिर्माणार्थम् अपेक्षिताः विशिष्टाः महाशिलाः सुदूरप्रदेशेभ्यः समागताः। समुद्रमार्गेण नदीमार्गेण च शिलाः आगताः। समुद्रतीरे शिलानां पर्वतः एव निर्मितः अभवत्। मन्दिरनिर्माणकार्यम् आरब्धम्।

देशस्य विविधेभ्यः कोणेभ्यः आगताः सहस्रशः शिल्पिनः कर्मकराः च अहोरात्रं कार्यं कृतवन्तः। रूक्षाः शिलाः शिल्पिनां कलाचातुर्यस्य कारणतः सुन्दरं रूपं प्राप्तवत्यः। शिलासु लताद्याकृतयः पौराणिकघटनाः च चित्रिताः अभवन्।

केषाञ्चित् वर्षाणाम् अनन्तरं मन्दिर-निर्माणकार्यं समाप्तम्। सागरतीरे मेघमण्डलस्पर्शी उन्नतः आलयः सिद्धः जातः। मन्दिरस्य सौन्दर्यं तावत् अस्ति यत् मन्दिरं पश्यन् द्रष्टा इहप्रपञ्चम् एव विस्मरति।


मन्दिरं द्रष्टुम् आगताः पृच्छन्ति– "मन्दिरं रमणीयम् अस्ति इति तु सत्यम् एव। किन्तु गर्भगृहे काऽपि मूर्तिः एव नास्ति खलु? कस्य देवस्य मन्दिरम् एतत्? कः अत्र प्रार्थनीयः?" इति।


इन्द्रद्युम्नस्य मनसि अपि एते प्रश्नाः उद्भवन्ति। 'स्वप्नवाणी मिथ्या न भवेत् खलु? विग्रहप्रतिष्ठापनयोगः इतोऽपि किमर्थं न प्राप्तः? निर्माणं समाप्तम् इति देवः किं न जानाति? जानन् अपि देवः किमर्थम् एवं क्रीडति?'

कदाचित् इन्द्रद्युम्नः आलयं प्रविश्य गर्भगृहस्य पुरतः उपविश्य अश्रूणि स्रावयन्– "देव! केन रूपेण भवान् भक्तान् अनुग्रहीतुम् इच्छति इत्येव न जानीमः वयम्। अत्र कीदृशी मूर्तिः स्थापनीया इति कदा सूचयति? महता श्रमेण निर्मिते एतस्मिन् देवालये मूर्तिम् अपश्यन्तः जनाः किं न उपहसन्ति? अस्माकं भक्तिं, श्रद्धां, श्रमं च मा व्यर्थीकरोतु कृपया। दयामय! करुणासागर! भक्तवत्सल! अस्मान् अनुगृह्णातु कृपया" इति प्रार्थितवान्।

राजा विविधैः प्रकारैः प्रार्थयन् अस्ति। तावता रात्रिः जाता। राजा प्रार्थयन् एव निद्रावशं गतः। तदा तेन स्वप्ने काचित् अशरीरवाणी श्रुता– "अत्रैव समीपे कृष्णरूपेण देवः अस्ति। तम् अन्विष्यतु। सः भवतः इष्टार्थं पूरयिष्यति" इति।

जागरितः इन्द्रद्युम्नः अशरीरवाण्यां दृढं विश्वसितवान। 'कृष्णस्य लीलाः





जगत्प्रसिद्धाः। सः भक्तैः सह क्रीडति। एषः च तस्य स्वभावः। अतः कृष्णस्य विग्रहः तथा सुलभतया न प्राप्येत' इति आलोचितवान् सः। 'निर्मलहृदयः, विवेकी भक्तः एव तं कृष्णम् अन्वेष्टुम् अर्हति' इति निश्चित्य राजा चतुरः पण्डितान् एतस्मिन् कार्ये नियोजितवान्। ते चतसृषु दिक्षु विग्रहस्य अन्वेषणार्थं प्रस्थितवन्तः।


तेषु चतुर्षु पण्डितेषु विद्यापतिः एव अल्पवयस्कः। सः पूर्वस्यां दिशि प्रस्थितः, किञ्चित् अग्रे गत्वा उत्तराभिमुखं गतवान्। तेन अग्रे महत् अरण्यं प्राप्तम्। मनसा कृष्णं ध्यायन् 'अरण्ये रक्षणस्य मार्गप्रदर्शनस्य च भारः कृष्णस्य एव' इति निश्चित्य अनन्यभावेन कृष्णस्य महिमानम् एव चिन्तयन् सः अग्रे गतवान्। यथा यथा अग्रे गम्यते तथा तथा अरण्यस्य गहनता अपि वर्धते।

एतस्मिन् अरण्ये कश्चन लघुपर्वतः दृष्टः विद्यापतिना। पर्वतशिखरतः तालयोपेतं मधुरं सङ्गीतं श्रूयते स्म। सङ्गीतरसम् आस्वादयन् अग्रे गतवान् विद्यापतिः। मृदङ्गध्वनिः, वेणुनादः, करपुटरवः च तेन स्फुटं श्रुतः। पर्वतस्य अन्यस्मात् पार्श्वतः एतत् सर्वम् आगच्छति इति ज्ञातवान् सः।

विद्यापतिः पर्वतम् आरुह्य अपरस्मिन् पार्श्वे दृष्टिं प्रसारितवान्। पर्वतस्य उपत्यकायां कश्चन रमणीयः परिसरः दृष्टः तेन। उपत्यकायां काश्चन शबरयुवतयः गायन्त्यः नृत्यं कुर्वन्ति स्म। कस्यचित् वृक्षस्य शाखां गृहीत्वा स्थित्वा नृत्यं पश्यन् सङ्गीतं शृणोति विद्यापतिः। सुदूरचलनात् सः नितरां श्रान्तः आसीत् खलु? इदानीं रमणीयस्य परिसरस्य, शबरयुवतीनां नृत्यस्य च दर्शनात्, मधुरस्य सङ्गीतस्य श्रवणात् च तस्य श्रान्तिः अपगता।

तावता अनतिदूरे एव व्याघ्रगर्जनं श्रुतम्। दिग्भ्रान्तः विद्यापतिः परिवृत्य दृष्टवान्। कश्चन घोरः व्याघ्रः गर्जन् तस्य समीपम् आगच्छन् अस्ति। निरायुधः विद्यापतिः किङ्कर्तव्यतामूढः सन् तत्रैव मूर्च्छां गतः।

तदा उपत्यकाप्रदेशतः कश्चन स्त्रीस्वरः



श्रुतः– 'व्याघ्रराज' इति। एतत् आह्वानं श्रुत्वा व्याघ्रः तत्रैव अतिष्ठत्।

"व्याघ्रराज! प्रत्यागच्छतु तावत्" इति कयाचित् स्त्रिया आदिष्टम्। एतम् आदेशं पालयन् व्याघ्रः अधः गत्वा आत्मानम् आहूतवत्याः स्त्रियः पादयोः समीपे विनयेन उपाविशत्। सा युवतिः व्याघ्रं प्रीत्या स्पृष्टवती। तत्रत्यासु एषा एव उन्नता सुन्दरी च आसीत्। तस्याः नाम ललिता इति। सा शबरराजस्य विश्वावसोः एकमात्रपुत्री।

ललितायाः आदेशानुसारं द्वे युवत्यौ विद्यापतिसमीपं त्वरया गतवत्यौ। एका पत्रपुटेन जलम् आनीय मुखस्य उपरि सिक्तवती। अपरा कदलीपत्रेण मृदु वीजितवती। विद्यापतिः सचेतनतां प्राप्य मन्दं नेत्रे उद्घाटितवान्। एका युवतिः पानार्थं जलं दत्तवती।


तावता ललिता तत्र आगत्य– "भवान् कः इति वयं न जानीमः। कुतः आगतः, कुत्र गच्छति इत्यपि न जानीमः। प्रायः अरण्ये मार्गभ्रष्टः सन् अत्र आगतवान् स्यात्। एतादृश्याम् अवस्थायां स्थितं भवन्तम् एवम् एव प्रेषयितुं वयं न इच्छामः। अतः अस्माकं वसतिम् आगच्छति वा भवान्?" इति पृष्टवती।

तस्याः वचनं श्रुत्वा विद्यापतिः अङ्गीकारपूर्वकं शिरः चालितवान्। उत्थाय गन्तुं सिद्धः जातः च।

ललिता अग्रे प्रस्थिता। सख्यः ताम् अनुसृतवत्यः। विद्यापतिः अपि ताम् अनुसृतवान्। ललिता एकां सखीं सूचितवती यत् अग्रे गत्वा अस्माकम् आगमनं सूचयतु इति। सा युवतिः धावन्ती गत्वा वृक्षाणां मध्ये अदृश्या अभवत्।

अल्पे एव काले अग्रे स्थितात् पर्वतात् आगतः शबरराजः विश्वावसुः अभिमुखम् आगत्य विद्यापतिं नमस्कृत्य– "नूतनाय अतिथये हृत्पूर्वकं स्वागतम्" इति गम्भीरध्वनिना उक्तवान्।

विद्यापतिः अपि शबरराजं नमस्कृत्य आत्मनः परिचयं निवेद्य– "महाराजस्य इन्द्रद्युम्नस्य कार्यस्य निमित्तम् आगतवान्



अस्मि'' इति उक्तवान्।

शबरराजः विश्वावसुः विद्यापतिम् आदरेण स्ववसतिं नीतवान्। वसत्यादिनिमित्तं सर्वाः व्यवस्थाः उपकल्पिताः। विद्यापतिः पण्डितः इति ज्ञातवतः विश्वावसोः महान् सन्तोषः। सः विद्यापतिं प्रार्थितवान् यत् भवता अत्रैव कानिचन दिनानि स्थित्वा वेदान्तविचारः बोधनीयः इति।

विद्यापतिः एतं प्रस्तावम् अङ्गीकृतवान्। अत्रत्येन सङ्गीतेन वशीकृतस्य तस्य मनः अपि अत्र वासम् इच्छति स्म एव। सः श्रुतीनाम् अर्थं, स्मृतीनां सारं, पुराणकथाः च सरलया शैल्या उदाहरणपुरस्सरं श्रावयति स्म। तस्य बोधनक्रमः रमणीयः आसीत्। राजा विश्वावसुः राजकुमारी ललिता च आसक्त्या तस्य पाठं शृणुतः।


ललिता विद्यापतौ विशेषादरं प्रकटयति स्म। एतत् विद्यापतिना अपि लक्षितम् एव। किन्तु सः जानाति स्म यत् अहं महोन्नतस्य कार्यस्य साधनार्थं प्रस्थितः इति। अतः सः सदापि कर्तव्यं स्मरन् भगवद्ध्यानेन कालं यापयन् आसीत्।

अत्रान्तरे कदाचित् विद्यापतिः तीव्रम् अस्वस्थः जातः, शय्याम् आश्रितवान् च। तदा ललिता परमया श्रद्धया तस्य उपचारं कृतवती। परस्परसान्निध्यतः उभौ आत्मानौ सन्निहितौ जातौ। विद्यापतिः ज्ञातवान् यत् मनः सीमाम् अतिक्रम्य व्यवहरत् अस्ति इति, अभिमानः अनुरागरूपेण परिवृत्तः अस्ति इति च। तावता ललितायाः पिता विश्वावसुः स्वयम् आगत्य 'मम पुत्रीं परिणयतु' इति प्रार्थितवान्। विद्यापतिः सम्मतिं प्रदर्शितवान्।

शरबयुवक-युवतीनां नृत्यगानादीनां मध्ये ललिता-विद्यापत्योः विवाहः सवैभवं सम्पन्नः।

दिनानि एवम् एव गतानि। ललितायाः परिणयतः सन्तुष्टः अस्ति विद्यापतिः। तथापि यदर्थं प्रस्थितं तत् कार्यम् अंशतः अपि न सिद्धम् इति खेदः तु तं बाधते।

अत्रान्तरे विद्यापतिना कश्चन विशेषविषयः लक्षितः। विश्वावसुः



प्रतिदिनम् अपि प्रातः उत्थाय कुत्रापि गच्छति। सूर्योदयानन्तरं प्रत्यागच्छति च। एवं गमनागमनं नियमरूपेण प्रचलति स्म। वृष्टिः, शैत्यं, झञ्झावातः इत्यादयः अपि एतं नियमं भञ्जयितुं न अर्हन्ति स्म।

विद्यापतिः विश्वावसोः एतत् नियमपालनस्थैर्यं दृष्ट्वा आश्चर्यचकितः। 'सः प्रतिदिनं कुत्र गत्वा आगच्छति इति ज्ञातव्यम्' इति कुतूहलम् अपि प्रवृद्धम्। सः ललिताम् एतद्विषये पृष्टवान्। तदा ललिता उक्तवती– "तत् तु रहस्यम्। केनापि न ज्ञातव्यं तत्" इति।

किन्तु अन्ते पत्युः अत्यासक्तिं शमयितुं सा उक्तवती– "भवतः अत्यासक्तिं दृष्ट्वा, आत्मीयतां च मनसि निधाय वदन्ती अस्मि। इतः समीपे काचित् गुहा अस्ति। गुहायां काचित् देवमूर्तिः अस्ति। अस्माकं पूर्वजैः सर्वैः पूजितः सः देवः। तस्य आराधनं प्रतिदिनम् अपि युक्ते समये भवेत् इति नियमः अस्ति। अतः मम पिता प्रातः तथा गच्छति। जनैः एतत् न ज्ञातव्यम्। तत्र जनाः सम्मिलिताः चेत् देवः गुहातः अदृश्यः भविष्यति इति श्रूयते" इति।

"मया अपि सः देवः द्रष्टव्यः एव। रहस्यपालनम् अहम् अपि जानामि। श्वशुरेण यत् ज्ञातं तत् जामात्रा अपि ज्ञातं चेत् न कोऽपि दोषः" इति उक्तवान् विद्यापतिः।

"भवतः वचनं युक्तम् एव स्यात्। रहस्यम् अन्यैः न ज्ञातव्यम् एव इति अस्ति पितुः आशयः। एवं स्थिते सः कथं वा भवता क्रियमाणं देवदर्शनम् अङ्गीकुर्यात्? अतः एतादृशीम् इच्छां परित्यजतु कृपया" इति प्रार्थितवती ललिता।

"एवं तर्हि अहं कश्चन परकीयः संवृत्तः" इति खेदेन उक्तवान् विद्यापतिः।

क्षणकालम् आलोच्य उक्तवती ललिता– "खेदं मा अनुभवतु। भवन्तं नीत्वा देवं प्रदर्शयितुं पितरं सूचयिष्यामि" इति।

–(अनुवर्तते)





जगन्नाथचरितम्

तस्मिन् दिने रात्रौ ललिता वार्तालापं कुर्वती पितरं निवेदितवती यत् मम पतिः एकवारं गुहास्थं देवं द्रष्टुम् इच्छति इति।

विश्वावसुः पुत्रीं कोपेन दृष्टवान्। किन्तु किमपि न उक्तवान्।

ललिता क्षणकालस्य मौनस्य अनन्तरं पितरम् पृष्टवती– "तात! अहं भवतः अद्वितीयः सन्तानः अस्मि खलु? यं भगवन्तं भवान् पूजयन् अस्ति तस्य पूजां भवदनन्तरं कः करिष्यति? भवतः जामात्रा विद्यापतिना एव खलु करणीयं तत्? एवं स्थिते तस्मै देवं प्रदर्शयामः चेत् का हानिः?" इति।

"पुत्रि! भवत्याः पतिः अस्मिन् अरण्यप्रदेशे चिरकालं तिष्ठेत् इति विश्वसिति वा भवती?" इति पृष्टवान् विश्वावसुः।

"तात! भवान् तं पुत्रवत् प्रीत्या यदि पश्येत् तर्हि सः इतः कुत्र वा गच्छेत्? अत्रैव तिष्ठेत् सः" इति उक्तवती ललिता।

"पुत्रि! भवती जानाति एव यत् विद्यापतिः भिन्ने परिसरे जातः, तदीयाः आचारविचाराः, संस्कृतिः च भिन्नाः एव इति। तथापि भवत्याः सन्तोषार्थम् अहं तस्मै देवं प्रदर्शयिष्यामि" इति वदन् विश्वावसुः पुत्र्याः शिरसि प्रीत्या हस्तं स्थापितवान्।

भगवतः पूजायाः दायित्वम् अन्यस्मै यदा दीयते तदा एव गुहां प्रति गन्तुं मार्गस्य प्रदर्शनम् इति तु सम्प्रदायः। विश्वावसुः एतस्य नियमस्य भङ्गं कर्तुं न इच्छति। अतः सः विद्यापतिम् उक्तवान्– "भवते अहं देवं

प्रदर्शयामि चेदपि गुहां प्रति मार्गं न प्रदर्शयामि" इति। विद्यापतिः एतत् अङ्गीकृतवान्।

अनन्तरदिने विश्वावसुः यथापूर्वं सूर्योदयतः एकघण्टां यावत् पूर्वम् उत्थितवान्। देवदर्शनार्थं सिद्धः जातः च। अनन्तरं विद्यापतेः नेत्रे बद्धे। विद्यापतेः दक्षिणहस्तं गृहीत्वा गुहां प्रति प्रस्थितवान् विश्वावसुः।


विद्यापतिः वामेन हस्तेन पूर्वम् एव सर्षपान् गृहीतवान् आसीत्। सः गच्छन् तान् सर्षपान् मार्गे पातयन् गतवान्। एवं विद्यापतिः गुहापर्यन्तम् अपि सर्षपं पातितवान्।

गुहासमीपं गत्वा विश्वावसुः विद्यापतिं प्रति– "इदानीं आवां गुहासमीपम् आगतौ स्वः। शिरः अवनमय्य गुहां प्रविशतु" इति उक्त्वा गुहां प्रविश्य विद्यापतेः नेत्रयोः बन्धनम् अपनीतवान्।

विद्यपतिः नेत्रे उद्घाट्य दृष्टवान्। सर्वत्र अन्धकारः दृष्टः तेन। ततः मन्दं मन्दं प्रकाशः अपि दृष्टः। गुहायां स्थितायाः शिलामय्याः वेदिकायाः उपरि विद्यापतेः दृष्टिः पतिता। विश्वावसुः वेदिकायां पुष्पाणि अर्पयन् आसीत्।

अकस्मात् गुहायां नीलः प्रकाशः उत्पन्नः। अपरस्मिन् क्षणे वेणुं वादयतः कृष्णस्य आकारः दृष्टः विद्यापतिना। सः आनन्देन आश्चर्येण च अप्रयत्नेन एव उक्तवान्– "अहो!" इति।

"किं जातं वत्स?" इति विद्यापतेः स्कन्धे



प्रीत्या स्वस्य हस्तं स्थापयन् पृष्टवान् विश्वावसुः।

विद्यापतिः मन्दहासं प्रकटितवान्, तावदेव। किमपि न उक्तवान् सः।

"किं जातं भवतः? स्वप्नं पश्यन् इव, स्वप्ने किमपि दृष्टम् इव दृश्यते भवान्? किं प्रवृत्तम्?" इति पृष्टवान् विश्वावसुः।

"किमपि न जातं श्रीमन्" इति उक्त्वा पुनरपि मौनम् आश्रितवान् विद्यापतिः।

विद्यापतिः आश्चर्यपूर्वकं प्रकटितस्य ध्वनेः कारणं वक्तुं न इच्छति इति ज्ञातवान् विश्वावसुः। अतः सः पुनः किमपि न पृष्टवान्।

अनन्तरं तौ ततः प्रस्थितवन्तौ। यथा गुहां प्रति आगमनसमये नेत्रबन्धनं कृतम् आसीत् तथैव प्रतिगमनसमये अपि विद्यापतेः नेत्रयोः बन्धनं कृतवान् आसीत् विश्वावसुः।

प्रत्यागतवन्तं पतिं पृष्टवती ललिता– "गुहायां भवता किं दृष्टम्?" इति।

तदा विद्यापतिः वस्तुस्थितिं गोपयन् उक्तवान्– "अन्धकारमय्यां तस्यां गुहायां किं वा दृश्येत? विशिष्टं किमपि न दृष्टं मया" इति।

गुहायाम् अलौकिकम् अपूर्वं च यत् दृश्यं दृष्टं तद्विषये पत्नीं प्रति कथनम् अनुचितम् इति भावयति विद्यापतिः। अतः तत् रहस्यम् आत्मनि एव गोपितवान् सः।

'दैवप्रेरणया महाराजः इन्द्रद्युम्नः भाविजनानां हितार्थं महत् कार्यं साधयितुं दीक्षां गृहीतवान्। तदङ्गतया च मयि महत्





दायित्वम् आरोपितवान् सः। एवं कार्यसाधनार्थं प्रस्थितः अहं कथमपि अत्र स्थितः, ललितां परिणीतवान् चापि। महाराजस्य कार्यस्य साधनं मम आद्यं कर्तव्यम्। तया दृष्ट्या ललितां प्रति गुहायां प्राप्तस्य अनुभवस्य अकथनम् एव वरम्' इति आलोचितवान् विद्यापतिः।

पुनः अन्यः विचारः आगतः तस्य मनसि— 'ललितां प्रति अकथनेन समस्या परिहृता तु न भवति। विश्वावसुना पूज्यमानः देवः श्रीकृष्णः एव। राजधानीं प्रति एतस्याः मूर्तेः नयनं मम कर्तव्यम्। किन्तु मूर्तिम् एवं नयामि चेत् अहं विश्वासद्रोही न भवेयं वा? विश्वावसोः वञ्चनं किम् उचितं स्यात्' इति।

'किं कृतं चेत् उचितं स्यात्' इति गाम्भीर्येण चिन्तयति विद्यापतिः। अत्रान्तरे अन्योऽपि विचारः मनसि आगतः— 'विश्वावसुः मयि पूर्णतः विश्वासं न स्थापितवान् आसीत्। अतः एव सः नेत्रबन्धनपूर्वकं मां गुहां नीतवान्। एवं स्थिते गुहायां स्थिता मूर्तिः मया नीता चेत् न कोऽपि अधर्मः' इति।

एवम् आदिनं चिन्तयति विद्यापतिः। चिन्तनकारणतः दिने आहारादिषु अपि अनासक्तिः। रात्रौ च निद्रा न प्राप्यते। किन्तु केवलेन निरन्तरचिन्तनेन समस्यायाः परिहारः तु न भवति खलु?

विद्यापतौ जातम् एतत् परिवर्तनं दृष्ट्वा ललिता नितरां खिन्ना। 'विद्यापतेः चिन्तायाः किं कारणं स्यात्' इति आलोचयति सा। 'विद्यापतिः नागरिकाणि सुखसाधनानि स्मरन् स्यात् वा? तेन अहं परिणीता यत् तेन सः खिन्नः स्यात् वा?'

विद्यापतेः चिन्तायाः मूलं कारणं ज्ञातुम् अशक्ता सा कदाचित् तम् एव 'चिन्तायाः कारणं किम्' इति पृष्टवती।

"नागरिकाणि सुखसाधनानि अत्र न सन्ति इति तु सत्यम् एव। किन्तु तेन अहं किञ्चिदपि न खिन्नः। मम मातापितरौ नगरे स्तः। अत्र आगतस्य मम बहूनि दिनानि अतीतानि। मम वार्तां अप्राप्य तौ चिन्ताक्रान्तौ स्याताम्। वृद्धयोः मातापित्रोः


Sankar



सेवा योगक्षेमनिर्वहणं च पुत्रस्य मम कर्तव्यं खलु? किन्तु भवतीम् अत्र त्यक्त्वा गन्तुम् अपि मम इच्छा नास्ति। यदि अहं मया सह भवतीं नयेयं तर्हि सर्वे प्रायः भवतीम् आश्चर्येण पश्येयुः। अन्यच्च भवती गच्छति चेत् भवतीं प्राणसमां भावयतः भवत्याः पितुः का अवस्था स्यात्? इदानीं किं करणीयम् इति न ज्ञायते।किङ्कर्तव्यतामूढः अस्मि अहम्" इति उक्तवान् विद्यापतिः।

"यावत् भवतः प्रीतिः मयि भवति तावत् अहं कस्मिंश्चित् अपि विषये चिन्तां न करोमि। जनाः मद्विषये किमपि वा चिन्तयन्तु नाम। तेन मम न काऽपि हानिः" इति उक्त्वा अश्रूणि स्रावयन्ती मार्जयन्ती च पुनः उक्तवती– "अहं भवता सह आगन्तुम् इच्छामि। किन्तु एवं गच्छामि चेत् वृद्धस्य मम पितुः योगक्षेमं कः पश्येत् इत्येव मम चिन्ता" इति।

"भवत्याः चिन्तनं युक्तम् एव। पितरं त्यक्त्वा गमनम् उचितं न भवेत्। अतः भवती अत्रैव तिष्ठतु। मम गमनार्थम् अनुज्ञां ददातु। मातापितरौ दृष्ट्वा, तयोः खेदं शमयित्वा अचिरात् एव प्रत्यागमिष्यामि" इति उक्तवान् विद्यापतिः।

"भवान् अचिरात् एव प्रत्यागमिष्यति इत्येतत् सत्यं वा?" इति आतङ्कयुक्तेन स्वरेण पृष्टवती ललिता।

"भवतीं विना अहं किं सुखेन तिष्ठेयम्?" इति प्रतिप्रश्नं कृतवान् विद्यापतिः। एतेन ललितायाः आतङ्कः अपगतः।

"एवं तर्हि गत्वा अचिरात् एव प्रत्यागच्छतु भवान्। मम श्वश्रूं श्वशुरं च सूचयतु यत् आशीर्वादं प्राप्तुम् अल्पे एव काले अहम् आगमिष्यामि इति" इति उक्तवती ललिता।

ललिता पत्युः इच्छां पितरं निवेदितवती। विश्वावसुः अपि अनुमतिं दत्तवान्। विद्यापतये बहूनि उपायनानि दातुम् इष्टवान् विश्वावसुः।

किन्तु विद्यापतिः एतत् निराकुर्वन् उक्तवान्– "एषः उपायनानां नयनार्थं न समयः। यदा ललितया सह गमिष्यामि तदा

उपायनानि अवश्यं नष्यामि। इदानीं गत्वा मातापितरौ विवाहवार्तां निवेदयामि'' इति।

विश्वावसुः एतत् अङ्गीकृतवान्। जामातुः प्रयाणार्थम् उत्तमस्य अश्वस्य व्यवस्थां कृतवान् सः।

विश्वावसोः ललितायाः च अनुज्ञां प्राप्य विद्यापतिः अश्वम् आरूढवान्, राजधानीं प्रति प्रस्थितः च। पतिः यावत् दृश्यते तावद्दूरम् अश्रुपूर्णनेत्रा ललिता पश्यन्ती स्थितवती।

केभ्यश्चित् दिनेभ्यः पूर्वं विद्यापतिः गुहां प्रति गच्छन् सर्षपान् पातितवान् आसीत् खलु? ते सर्षपाः इदानीम् अङ्कुरिताः आसन्। अतः गुहागमनमार्गः स्फुटं दृश्यते स्म। विद्यापतिः विना क्लेशं गुहां प्राप्तवान्।

गुहायाः मुखद्वारे महाशिलाः दृश्यन्ते स्म। विद्यापतिः अश्वात् अवतीर्य मन्दं गुहायाः अन्तः गतवान्। गुहायां तेन पुनरपि दिव्यः अनुभवः प्राप्तः।

सः मनसि एव भगवन्तं क्षमां प्रार्थितवान्— 'देव! भवति विश्वस्य अहं यत् उचितम् इति भासते तत् कुर्वन् अस्मि। अज्ञानतः मया कोऽपि दोषः आचरितः चेत् कृपया अहं क्षन्तव्यः। भगवन्! मां रक्षतु कृपया' इति।

अनन्तरं सः शिलामय्यां वेदिकायां स्थितां मूर्तिम् उन्नीय नेत्राभ्यां भक्त्या स्पृष्टवान्। ततः मूर्तिं स्यूते स्थापयित्वा गुहातः बहिः आगत्य अश्वम् आरूढवान् च।

यद्यपि मूर्तिः चौर्येण नीयमाना अस्ति तथापि आत्मनि हीनभावनां न अनुभवति विद्यापतिः। 'पवित्रे कार्ये अहम् उद्युक्तः अस्मि। दैवप्रेरणया एव सर्वं प्रचलति। देवः मद्द्वारा सर्वं कारयति। अतः पापपुण्ययोः लेपः सर्वथा नास्ति मम' इति चिन्तयति विद्यापतिः।

ततः राजधानीं गन्तुं योग्यं मार्गं न जानाति विद्यापतिः। तथापि सः भगवन्तं प्रार्थयन् युक्तम् इति तर्किते मार्गे अश्वं प्रेरितवान्। अश्वः वेगेन अग्रे अधावत्।

—(अनुवर्तते)





जगन्नाथचरितम्

अश्वः येन मार्गेण नयति तेन मार्गेण गच्छन् अस्ति विद्यापतिः। कियत्कालम् एवं प्रयाणं प्रवृत्तम् इति तु न ज्ञायते। अन्ते अरण्यं समाप्तम्। विशालः अङ्गणप्रदेशः प्राप्तः।

इदानीं कस्यां दिशि गन्तव्यम् इति स्पष्टा कल्पना प्राप्ता विद्यापतिना। अतः मनसि निश्चिन्तताभावः उत्पन्नः। समीपे एव तेन स्फटिकसदृशेन जलेन युक्तः तडागः दृष्टः। तडागसमीपं गत्वा अश्वात् अवतीर्य शिलायाः उपरि उपविष्टवान् सः। छाया तु आसीत् एव।

ललितया सज्जीकृत्य दत्तं पाथेयं भुक्त्वा जलं पीत्वा किञ्चित् विश्रान्तिं स्वीकृतवान् विद्यापतिः। पुनः अरण्यं दृष्ट्वा विश्वावसुं ललितां च स्मृत्वा मनसि एव तयोः क्षमां प्रार्थयन् अश्वम् आरुह्य राजधानीं प्रति प्रयाणम् आरब्धवान्। सायङ्काले सः राजधानीं प्राप्तवान्।

विद्यापतेः आगमनं दूरात् एव ज्ञात्वा कश्चन अधिकारी राजानं निवेदितवान्। विद्यापतेः आगमनम् एव प्रतीक्षमाणः राजा सन्तोषेण उत्थाय आगत्य– "आगच्छतु। भवन्तं प्रतीक्षमाणः एव आसम्। यदर्थं गतं तत् कार्यं सिद्धं वा?" इति कातरतया पृष्टवान्।

"महाराज! यस्याः निमित्तम् अहं गतः सा प्रतिमा मया आनीता इति भावयामि। तथापि ...." इति वचनम् अर्धे स्थगितवान् विद्यापतिः।

"पण्डितवर्य! निस्सङ्कोचं वदतु भोः।



सत्कार्यसाधनसमये विघ्नाः समस्याः च सहजाः। भवता का समस्या सम्मुखीकृता? वदतु। तस्याः परिहारार्थं यथाशक्ति प्रयत्नं करिष्यामः'' इति उक्तवान् राजा।

''प्रभो! मम सङ्कटं परिहर्तुं प्रायः कोऽपि न शक्नोति। एषा मूर्तिः मया चौर्येण आनीता। यः मयि पूर्णतः विश्वस्य महता आदरेण स्वस्य अद्वितीयां कन्यां मह्यं दत्तवान् सोऽयं महात्मा मया वञ्चितः। तदीया मूर्तिः मया चोरिता। निष्कपटः सः सज्जनः तस्य पुत्री च मद्विषये किं चिन्तयतः इति न जानामि। क्षमानर्हः, परिहाररहितः अपराधः कृतः मया। एतावता मया कृतम् अकार्यं तत्र ज्ञातं स्यात्। सः सज्जनः 'सर्वनाशः जातः' इति भावयन् रुदन् स्यात्'' इति उक्तवान् विद्यापतिः।

''शान्तः भवतु विद्यापते! एषा चिन्ता एतत्क्षणे एव भवता परित्यक्तव्या। देवालयनिर्माणार्थं महान् व्ययः कृतः। सुदूरात् शिल्पिनः समागत्य सेवाभावनया कार्यं कृत्वा मन्दिरं निर्मितवन्तः। लोकक्षेमार्थम् एव अस्ति एतत् मन्दिरम्। लोककल्याणकार्ये कस्यचित् एकस्य द्वयोः वा खेदः यदि भवेत् तर्हि तत् गौणम्। अतः भवता चिन्ता न करणीया। अन्यच्च मया स्वप्ने दृष्टं यत् प्रकाशमानः कश्चन दारुखण्डः समुद्रेण तीरम् आनीतः इति। तादृशः दारुखण्डः अद्य प्रातः समुद्रतीरे प्राप्तः। भवता आनीता मूर्तिः विष्णोः अंशेन युक्ता खलु? तां मूर्तिं समुद्रतीरे प्राप्ते दारुखण्डे योजयित्वा आलये प्रतिष्ठापयिष्यामः। भवन्तं यः विश्वासेन दृष्टवान् सः महानुभावः अपि आगत्य तां मूर्तिं पश्यतु। एतेन सः निश्चयेन सन्तुष्टः भविष्यति। भवता कृतः दोषः तेन क्षालितः भविष्यति। अतः खेदः सर्वथा मास्तु भवतः'' इति उत्साहेन उक्तवान् राजा।

तावता तत्र स्थिताः मन्त्रिप्रभृतयः उक्तवन्तः— ''भवतः योजना युक्ता अस्ति महाराज! सः दारुखण्डः विग्रहनिर्माणार्थं योग्यः अस्ति'' इति।

अनन्तरक्षणे एव दश नाविकाः समुद्रतीरं गत्वा जले स्थितं तं दारुखण्डं तीरस्य उपरि

आनेतुं प्रयत्नं कृतवन्तः। किन्तु तैः न शक्तम्। तरणचतुराः केचन बलशालिनः दारुखण्डं बलेन नोदितवन्तः। तथापि प्रयोजनं न जातम्।


अन्ते दारुखण्डं रज्ज्वा बद्ध्वा रज्जोः अपरम् अन्तं नौकासु बद्ध्वा आकर्षणं कृतम्। तथापि दारुखण्डः अङ्गुलमात्रम् अपि न विचलितः।

एतत् दृष्ट्वा सर्वे आश्चर्यचकिताः। अग्रे किं करणीयम् इति न ज्ञातं महाराजेन। विद्यापति-मन्त्रिणोः अपि एषा एव स्थितिः। 'जले प्लवमानः अल्पः दारुखण्डः एवम् अचलः कथम् अभवत्?' इति राज्ञः चिन्ता। 'यावत् दारुखण्डः तीरं न प्राप्नोति तावत् अहम् अन्यत्र कुत्रापि न गमिष्यामि' इति दृढसङ्कल्पं कृत्वा राजा समुद्रतीरे एव उपविष्टवान्।

सायङ्कालः गतः। रात्रिः आगता। राज्ञी सुवर्णमयशिबिकया आगत्य राजानं पृष्टवती— "प्रातःकालपर्यन्तम् अपि अत्रैव स्थास्यति वा भवान्?" इति।

"किं करणीयम् इति न ज्ञायते। अग्रे किं करणीयम् इति यावत् न ज्ञायते तावत् अत्रैव तिष्ठामि" इति उक्तवान् राजा। राज्ञी मौनम् आश्रितवती।

किञ्चित्कालानन्तरं राजा दारुखण्डं तीरं प्रति आनेतुं प्रयतमानान् उद्दिश्य उक्तवान्— "प्रयत्नं स्थगयन्तु" इति।



अनन्तरं विद्यापतिं स्वसमीपम् आनाय्य— "सः अपूर्वः दारुखण्डः किमर्थं न चलति इति ज्ञातं मया। भवता आनीतां प्रतिमां यः प्रतिदिनम् अरण्ये पूजयन् आसीत् तस्य महानुभावस्य समीपं मां नयतु" इति सूचितवान्।

विद्यापतिः मार्गं प्रदर्शयन् अग्रे प्रस्थितवान्। महाराजः मङ्गलद्रव्यैः सह मन्त्रिप्रभृतिभिः प्रमुखैः च सह तम् अनुसृतवान्। ते अरण्यमार्गेण विश्वावसोः वसतिम् उद्दिश्य गतवन्तः। अनन्तरदिने मध्याह्नसमये ते विश्वावसोः वसतेः पार्श्वे स्थितं पर्वतं प्राप्तवन्तः।

सामान्यतः विश्वावसोः वसतिः सदापि



शान्ततायुक्ता भवति। अद्यापि तत्र शान्तता अस्ति। किन्तु एषा न सहजा, अपि तु विलक्षणा। विषादच्छाया तत्र सर्वत्र प्रसृता अस्ति।

प्रतिदिनम् इव सूर्योदयात् पूर्वं गुहां गतः विश्वावसुः अल्पे एव काले प्रत्यागत्य पुत्रीं ललिताम् उद्दिश्य– "वत्से! भवत्या पतिः महत् अकार्यं कृतवान् भोः" इति वदन् दुःखावेगेन अधः पतितवान्।


ललिता दिग्भ्रान्ता सती पितुः समीपं धावितवती। विश्वावसोः किं जातम् इति अजानन्तः सेवकाः तम् अन्तः नीत्वा शैत्योपचारं कृतवन्तः। तदा विश्वावसुः मन्दं नेत्रे उद्घाट्य परितः दृष्ट्वा पुनः नेत्रे निमीलितवान्।

किं प्रवृत्तं स्यात् इति तर्कितवती ललिता। 'परम्परया पूजितः देवविग्रहः विद्यापतिना चौर्येण नीतः, अतः एव मम पितुः एतादृशी गतिः आगता' इति ज्ञातवती सा। 'विद्यापतिः अरण्ये कानिचन दिनानि स्थितवान् यत् तस्य कारणं प्रेमाभिमानादयः न आसन्, अपि तु अन्यदेव आसीत्' इति चिन्तयन्ती सा खेदम् अनुभूतवती।

मध्याह्नः सायङ्कालः च गतः। रात्रिः अपि आगता। तथापि विश्वावसुः नेत्रे न उन्मीलितवान्। ललिता निद्राहारम् अपि विस्मृत्य तस्य पार्श्वे एव उपविष्टवती। अनन्तरदिने उषःकाले विश्वावसुः मन्दम् उत्थाय गुहां प्रति प्रस्थितवान्। ललिता अन्ये बान्धवाः च तम् अनुसृतवन्तः। गुहां गतः विश्वावसुः मूर्तेः शिलापीठम् आलिङ्ग्य उच्चैः रोदनं करोति। यावत् निवेदितं चेदपि न उत्तिष्ठति। अन्ये किङ्कर्तव्यतामूढाः सन्तः मौनं स्थितवन्तः।

मध्याह्नसमये कश्चन शबरयुवकः धावन् आगत्य दीर्घं निःश्वसन्– "पर्वतमार्गेण केचन आगच्छन्तः सन्ति। तेषु महाराजः अपि अस्ति। कस्यापि हस्ते आयुधं न दृश्यते" इति निवेदितवान्।

किञ्चित्कालानन्तरम् अपरः कश्चित् आगत्य निवेदितवान्– "विद्यापतिः एव मार्गं प्रदर्शयन् तान् आनयन् अस्ति" इति।




तत् श्रुत्वा कश्चन मध्यवयस्कः शबरः कोपेन उक्तवान्– "दिव्यमूर्तेः चौर्येण तृप्तिः न जाता इति भाति। सर्वस्वम् अपहर्तुं ते आगच्छन्तः सन्ति" इति।

"अये! अन्यथा चिन्तनं न उचितम्। तेषु कस्यापि हस्ते आयुधं नास्ति इति श्रुतं खलु? अस्माकं स्वामिनं विश्वावसुं द्रष्टुम् एव आगच्छन्तः स्युः ते" इति उक्तवान् कश्चन शबरवृद्धः।

विश्वावसुः मन्दम् उत्थाय गुहायाः पुरतः नमस्कारभङ्ग्या स्थितवान्। राजा तं दूरात् एव दृष्ट्वा हस्तौ प्रसार्य वेगेन अग्रे आगत्य विश्वावसुं प्रीत्या आलिङ्गितवान्। अश्रूणि स्रावयन् सः शबरराजम् उक्तवान्– "महात्मन्! भक्ताग्रेसर! वस्तुतः विग्रहचोरः अहं, न तु विद्यापतिः। मां क्षन्तुम् अर्हति वा भवान्?" इति।

विश्वावसोः नेत्राभ्याम् अपि अश्रूणि स्रवन्ति। सः अश्रूणि मार्जयन् राज्ञः उपवेशनार्थं शिलां प्रदर्शितवान्। राजा शिलायाः उपरि उपविश्य– "विश्वावसो, प्रथमं मया उच्यमानं शृणोतु" इति उक्त्वा, पुरीतीरे कृतम् आलयनिर्माणं, स्वप्नसन्देशानुगुणं कृतं पण्डितप्रेषणं, विद्यापतिना कृतं कार्यं च विस्तरेण निवेद्य पुनः उक्तवान्– "विश्वावसो! अद्यावधि सः देवः भवद्वंशीयानां पूजां प्राप्नुवन् आसीत्। इतः परं सर्वेषां जनानां पूजा तेन स्वीकरणीया इति दैवेच्छा अस्ति इति भाति। एषा दिव्यमूर्तिः समुद्रात् प्राप्ते दारुखण्डे समीचीनतया योजनीया इति अस्माकं सङ्कल्पः। तदर्थं भवतः अनुज्ञा अपेक्षिता। अस्माभिः स्वप्रयत्नेन यद्यत् शक्यं तत्सर्वं कृतम्। भवतः साहाय्यं विना कार्यसिद्धिः न भविष्यति" इति।

विश्वावसुः अङ्गीकारपूर्वकं शिरः चालितवान्। अनन्तरं राजा दारुखण्डप्राप्तिं, तस्य आनयने कृतं प्रयत्नं, प्राप्तम् असाफल्यं च निवेद्य– "भवतः उपस्थितौ एव विग्रहस्य प्रतिष्ठापनं भवेत् इति देवेच्छा अस्ति। अतः भवता आलयसमीपम् आगत्य एतत् कार्यं निर्विघ्नतया यथा परिसमाप्येत तथा



उपकर्तव्यम्" इति प्रार्थितवान्।

क्षणकालस्य मौनस्य अनन्तरं विश्वावसुः उक्तवान्– "प्रभो! भवतः आज्ञायाः अनुगुणम् अहं भवता सह आगन्तुं सिद्धः" इति।

राजा परमसन्तोषं प्राप्य विश्वावसुं पुनरपि प्रीत्या आलिङ्ग्य पार्श्वे स्थितां ललिताम् उक्तवान्– "वत्से! भवती पतिम् अन्यथा मा चिन्तयतु। महोन्नतस्य कार्यस्य निमित्तं तेन रहस्यं गोपितम्। अनौचित्यं तत्र किमपि अस्ति चेत् सः क्षन्तव्यः भवत्या" इति।

तत्रैव स्थितः विद्यापतिः ललिताम् उक्तवान्– "दैवकार्यार्थं मया दोषः कृतः। मां क्षन्तुम् अर्हति भवती। यथा पूर्वं मया उक्तं तथा अचिरात् एव भवतीं राजधानीं नेष्यामि। तावत् सहनया तिष्ठतु" इति।

ललिता कटाक्षेण विद्यापतिं दृष्टवती। तस्याः मुखतः वचनानि न निर्गतानि।

राजा आत्मना सह आनीतानि मङ्गलद्रव्याणि फलपुष्पवस्त्रादीनि च पितापुत्र्योः पुरतः स्थापितवान्।


अनन्तरदिने राजा परिवारेण सह समुद्रतीरं गतवान्। विश्वावसुः नौकया गत्वा तं दारुखण्डं स्पृष्टवान्। तस्य नौकया सहैव दारुखण्डः तीरम् आगतः।

राजभटाः महता सन्तोषेण तं दारुखण्डं राजप्रासादं नीतवन्तः।

अनन्तरदिने राजा शिल्पिनः आहूय पृष्टवान्– "एतस्मिन् दारुखण्डे कीदृशी मूर्तिः निर्मिता चेत् वरं भवेत्?" इति।

तदा शिल्पिनः उक्तवन्तः– "वयं शिलासु देवदेवीनां मूर्तीः निर्मातुं शक्नुमः। किन्तु दारुखण्डे मूर्तिनिर्माणं वयं सर्वथा न जानीमः। अज्ञाते विषये कथं वा मार्गम् उपदिशेम वयम्?" इति।

तस्मिन् एव समये तत्र कश्चन वृद्धः आगत्य– "महाराज! भवता निर्मिते आलये बलभद्र-सुभद्रासमेतस्य कृष्णस्य विग्रहः भवति चेत् वरं भवेत्। भगवतः सङ्कल्पः तथा अस्ति। अहं तादृशं विग्रहं दारुखण्डेन निर्माय दातुं सिद्धः अस्मि। किन्तु कश्चन



नियमः अस्ति मम। अहं दारुखण्डेन सह प्रकोष्ठं प्रविश्य द्वारपिधानं करिष्यामि। विग्रहनिर्माणकार्यस्य समाप्तेः अनन्तरम् अहम् एव द्वारम् उद्घाटयिष्यामि। एतन्मध्ये कोऽपि मां न आह्वयेत्" इति उक्तवान्।

"एवं तर्हि भवतः आहारादीनां का व्यवस्था?" इति पृष्टवान् राजा।

"कार्यस्य समाप्तेः अनन्तरम् एव आहारस्य स्वीकारः" इति उक्तवान् वृद्धः।

राजा एतत् अङ्गीकृतवान्। राजभवनस्य कश्चन विशालः प्रकोष्ठः वृद्धाय शिल्पिने दत्तः। वृद्धः दारुखण्डेन सह प्रकोष्ठं प्रविश्य द्वारपिधानं कृतवान्। विग्रहनिर्माणकार्यम् आरब्धवान् च। बहिस्तात् काष्ठच्छेदनशब्दः श्रूयते। राज्ञी सदापि काष्ठच्छेदनशब्दं शृण्वती तिष्ठति।

कानिचन दिनानि अतीतानि। प्रकोष्ठात् इदानीं शब्दः न श्रूयते। अनन्तरदिने अपि शब्दः न श्रुतः। 'अन्नपानादिरहितस्य शिल्पिनः गतिः शोचनीया जाता स्यात्' इति भावयन्ती राज्ञी कृतककुञ्चिकया द्वारम् उद्घाट्य अन्तः गतवती।

श्रद्धया विग्रहकार्ये मग्नः शिल्पी राज्ञीं दृष्ट्वा क्षणमात्रेण अदृश्यः जातः। विग्रहस्य परिष्कारकार्यम् इतोऽपि न समाप्तम् आसीत्। तावता एव कार्यं स्थगितम्। देवशिल्पी विश्वकर्मा एव वृद्धरूपेण आगतः आसीत् इति जनाः भावितवन्तः। राज्ञी स्वस्य दोषार्थं पश्चात्तापम् अनुभूतवती।

सर्वं दैवाधीनम् इति वदन् राजा विद्यापतिना आनीतां दिव्यप्रतिमां कृष्णविग्रहस्य अन्तः योजयित्वा बलभद्र-सुभद्रासहितं तं विग्रहं नूतने मन्दिरे शास्त्रोक्तक्रमेण प्रतिष्ठापितवान्।

विद्यापतिः तदनन्तरं तत्कुटुम्बीयाः च तस्य विग्रहस्य अर्चकाः जाताः।

तस्मात् दिनतः आरभ्य पुरीस्थं जगन्नाथमन्दिरं विष्णुक्षेत्रेषु प्रमुखं सत् जगद्विख्यातम् अस्ति।

—(समाप्तम्)

